पवयणमंगलसारं वुच्छामि अहं समासेणं ॥ १ ॥

पढमं णमह जिणाणं ओहिजिणाणं च णमह सव्वेसिं ।
परमोहिजिणे पणमह अणंतओहीजिणे णमह ॥ २ ॥

सव्वोहिजिणे वंदे पणमह भावेण केवलिजिणे य ।
णमह य भवत्थकेवलिजिणणाहे तिविहजोएणं ॥ ३ ॥

पणमह उज्जुमईणं विउलमईणं च णमह भत्तीए ।
पण्हासमणे पणमह णमह तहा बीयबुद्धीणं ॥ ४ ॥

पणमेह कुट्ठबुद्धी पयाणुसारीण णमह सव्वेसिं ।
पणमामि सुयहराणं [13]णमह य संभिन्नसोयाणं ॥ ५ ॥

पणमह चउदसपुव्वी तह दसपुव्वी अ वायगे वंदे ।
इक्कारसंगसुत्तत्यधारए णमह आयरिए ॥ ६ ॥

चारणसमणे पणमह तह जंघाचारणे अ पणमामि ।
वंदे विज्जासिद्धे आगासगेए अ जिणकप्पे ॥ ७ ॥

---

१. सेण° कु० । २. सव्वाण कु० । ३ °णे नमह य अ° अ० । ४. वंदे सव्वा (व्वो) हिजिणे प° कु० । ५ °जोएण कु० । ६ णमह य उ° कु० । ७ °ह सव्वसि अ० । ८. पण्णास° कु० । ९. °ह य तह बी° कु० । १० पणमह कोट्ठ° कु० । ११ सव्वाण कु० । १२. पणमह सुयधराण कु० । १३. °ण पणमह स° अ० । १४ °संभिण्णसो° कु० । १५. वंदे चोद्दस° कु० । १६. वायए वंदे कु० । १७ एयारसंग कु० । १८. °गमे य जि° कु० ।

आमोसहिणो वंदे खेलोसहि-जल्लमोसहे णमह ।
सव्वोसहिणो वंदे पणमह आसीविसे[2] चेव ॥ ८ ॥

पणमह [3]दिट्ठीविसिणो वयणविसे णमह तत्तलेसिल्ले ।
वंदामि सीअलेसे विप्पोसहिणो अ वंदामि ॥ ९ ॥

खीरासवाण णमिमो महुआसवाण वंदिमो चलणे ।
अमयासवाण पणमह अक्खीणमहाणसे वंदे ॥ १० ॥

पणमामि विउव्वीणं जलहीगमणाण भूमिमज्जीणं ।
वंदामि अणुअरूवे महल्लरूवे पणिवयामि ॥ ११ ॥

मणवेगिणो अ पणमह गिरिरायअच्छगे पणिवयामि ।
दिस्सादिस्से णमिमो णमह य संभिन्नइड्ढिसंपन्ने ॥ १२ ॥

पणमह पडिमावण्णे तवोविहाणेसु चेव सव्वेसु ।
पणमामि गणहराणं जिणजणणीणं च पणमामि ॥ १३ ॥

केवलनाणं पणमामि दंसणं तह य सव्वनाणाइं ।
चारित्तं पंचविहं तेसु अ जे साहुणो सव्वे ॥ १४ ॥

चक्कं छत्तं रयणं ज्झओ अ चमराइँ दुंदुहीओ य ।
सिंहासण-किंकिल्ली पणमह वाणी जिणिंदस्स ॥ १५ ॥

वंदामि सव्वसिद्धे पंचाणुत्तरनिवासिणो जे अ ।
लोगंतिए अ देवे वंदे सव्वे सुरिंदे अ ॥ १६ ॥

---

१. °जल्लमहिणो कु० । २. °से तह य कु० । ३ दिट्ठिवि° अ० । ४ °ह तेयले° कु० । ५ °सविणो ण° कु० । ६. महुस्सवाण च वं० कु० । ७ अमयस्सवाण कु० । ८. भूमिसज्जीण कु० । ९. पणमामि कु० । १०. अणुयरूए म° कु० । ११. ऽ. °रूवे य पणमामि कु० । १२ °रायपडिच्छिरे य पणमामि कु० । १३. सव्वड्ढि° कु० । १४. चेय स° कु० । १५. °ही वनी अ० । १६. सीहासण° कु० । १७ किंकेली कु० । १८. लोयंतिए य देवे वदह स° कु० ।

आहारगदेहधरे उवसामगसेढिसंठिए वंदे ।
सम्मदिट्ठिप्पभिई सव्वे गुणठाणगे वंदे ॥ १७ ॥

संती कुंथू अ अरो एआणं आसि नव महानिहिणो ।
चउदस रयणाणि पुढो छन्नउई गामकोडीओ ॥ १८ ॥

ता एयाणं पणमह पणमह अन्ने वि चक्किणो सव्वे ।
जे अरहंति पणामं भवम्मि धुवभाविमुक्खा य ॥ १९ ॥†

बल-केसवाण जुअले पणमह अन्ने वि भव्वठाणे अ ।
सव्वे वि वंदणिज्जे पवयणसारे पणिवयामि ॥ २० ॥

ॐ मे अ वग्गु वग्गु सोमे सोमणसे होउ महुमहुरे ।
किलि किलि अप्पडिचक्का हिलि हिलि देवीओ सव्वाओ ॥ २१ ॥

इय पवयणस्स सारं मंगलमेअं तु पूईअं इत्थ ।
एयं जो पढइ णरो सम्मद्दिट्ठी वि गोसग्गे ॥ २२ ॥

तंदिवसं तस्स भवे कल्लाणपरंपरा सुविहिअस्स ।
जं जं सुहं पसत्थं मंगल्लं होइ [12]तं तस्स ॥ २३ ॥

इति प्रवचनमङ्गलसारस्तवः ।

श्रीसूरिणा सूरिमन्त्रध्यानावसरे उभयसन्ध्यं च सम्यग् ध्येयः स्व-परहितार्थे ॥

*

१ °रयदे° कु० । २. °संतिए अ० । ३. °प्पभुई कु० । ४ °ठाणए वंदे कु० । ५ °महाणिहिओ कु० । ६ चोद्दसरयणाइँ पुणो छ° कु० । † कु° पुस्तके नास्तीय गाथा । ७ अण्णे य भव्वठाणेसु कु० । ८. ओ मे भगवा वग्गू सुमणे ग होंतु महुमहुरा कु० । ९. किलियपडीचक्का कु० । १०. °अं एत्थ कु० । ११. तद्दियसं कु० । १२ त तं च कु० ॥

कु० कुवलयमाला । अ० संपादकसत्का प्रतिः ।

८. परिशिष्टम् ।

सिरिमाणदेवसूरिविरइया

सिरिसूरिमंतथुई ॥

[पढमा वायणा]

सिरिसूरिमंतपवरे जे सिद्धा सुयपवुड्ढिसंजणगा ।
तन्नयणसंगहो मे वण्णिज्जइ तप्पए नमिउं ॥ १ ॥
जिण-ओहिअ-परमोहिअ-णंतोहिअ-णंतणंतओहिजिणा ।
केवलि-भवत्थकेवलि-अभवत्थियकेवलीणं च ॥ २ ॥
उज्जुमई-विउलमई-वेउव्वियलद्धि-सव्वलद्धीणं ।
पण्हासमणाण तहा जंघाचारणमुणीणं च ॥ ३ ॥
विज्जासिद्धाण तहा आगासगामीण तह य निच्चं पि ।
आमोसहि-विप्पोसहि-खेलोसहि-जल्लओसहीणं च ॥ ४ ॥
सव्वोसहि-आसीविस-अट्ठंगनिमित्तधारयाणं च ।
वयणविस-तेउलेसाण पणमियो सीयलेसाणं ॥ ५ ॥
चउदस-दसपुव्वीणं एगारसअंगसुत्तधारीणं ।
संभिन्नसोयाण तहा दुबोलसंगीण सव्वसिद्धाणं ॥ ६ ॥
उग्गतवचरणचारीणमेव बत्तीसथुइपयाणं च ।
आइम्मि 'नमो ॐ ह्रीं' पढमपयाओ छट्ठिबहुवयणं ॥७॥

*

[बीया वायणा]

खीरासव-महुआसव-अमियासवलद्धियाण पत्तेयं ।
अक्खीणमहाणससंठियाण संभिन्नसोयाणं ॥ १ ॥
तत्तो पयाणुसारीलद्धीणं तह य बीयबुद्धीणं ।
तत्तो य कुट्ठबुद्धीणं सव्वपया 'ॐ नमो' पुव्वं ॥ २ ॥

जिण-ओहिं आरब्भा जाव य वेउव्विलद्धिपयर्य च ।
चउदस-दसपुव्वीणं तह उण एगारसंगीणं ॥ ३ ॥
एए चउवीसपए नायव्वे सूरिणो पयरमंते ।
मायावण्णविरहिए नूणमुवरिज्जए निच्चं ॥ ४ ॥

*

[तइया वायणा]

रागाइरिउजईणं नमो जिणाणं नमो महं होउ ।
एवं ओहिजिणाणं परमोहीणं तहा तेसिं ॥ १ ॥
एवमणंतोहीणं णंताणंतोहिजुयजिणाण नमो ।
सामन्नकेवलीणं भवाभवत्थाण तेसिं तहा ॥ २ ॥
उग्गतवचरणचारीणमेवमित्तो नमो होइ ।
चउदस-दसपुव्वीणं नमो तहेगारसंगीणं ॥ ३ ॥
एएसिं सव्वेसिं एवं काउं अहं नमोकारं ।
जमियं विज्जं पउंजे सा मे विज्जा पसिज्झिज्जा ॥ ४ ॥
निच्चं नमो भगवओ बाहुबलिस्सेह पण्हसमणस्स ।
ॐ वग्गुं वग्गु निवग्गुं निवग्गुमग्गंगयस्स तहा ॥ ५ ॥
समणे वि य सोमणसे महुमहुरे जिणवरे नमंसामि ।
इरिकाली पिरिकाली सिरिकाली तह य महकाली ॥ ६ ॥
किरियाए हिरियाए अ संगए तिविहकालयं विरए ।
सुहसाहए य तह सुत्तिसाहए साहुणो वंदे ॥ ७ ॥
ॐ किरिकिरिकालि पिरिपिरिकालि च [? तहा] सिरिसिरिकालि ।
हिरिहिरिकालिपयं पि य सिरि य सिरि य आयरियकालि ॥ ८ ॥
किरिमेरुं पिरिमेरुं सिरिमेरुं तह य होउ हिरिमेरुं ।
आयरिमेरुं पयमवि साहंते सूरिणो वंदे ॥ ९ ॥
इयमंतपयसमेया थुणिया सिरिमाणदेवसूरिहिं ।
जिण-सूरि-साहुणो सइ दिंतु थुणंताण सिद्धिसुहं ॥ १० ॥

९. परिशिष्टम् ।

श्रीपूर्णचन्द्रसूरिविरचितं

श्रीसूरिविद्यागर्भितं लब्धिस्तोत्रम् ।

—*—

उत्तचरुणयपचं झाणं धरिऊण मुहगमुद्दाए ।
जो झाइ सूरिविज्जं तस्स वसे तिहुअणं सयलं ॥ १ ॥
सजलजलवाहकालं झाणं धरिऊण चक्कमुद्दाए ।
जो झाइ सूरिविज्जं तस्स खयं जाइ रिउवग्गो ॥ २ ॥
जिणे-ओहिअ-परमोहिअ-णंतोहिअ-णंतणंतओहिजिणा ।
केवलि-भवत्थकेवलि-अभवत्थिअकेवलीणं च ॥ ३ ॥
उज्जुमई विउलमई वेउव्वियलद्धि-सव्वलद्धीणं ।
पण्हासमणा य तहा जंघाचारणमुणीणं च ॥ ४ ॥
विज्जासिद्धाणं तह आगासगामीण तह य निच्चं पि ।
वयणविस-त्तत्तलेसाण पणमिमो सीअलेसाणं ॥ ५ ॥
चउदस-दसपुव्वीणं इक्कारसअंग[गुरु ?]धारीणं ।
तह य दुवालसअंगीण उग्गतवचरणचारीणं ॥ ६ ॥
सव्वेसि पि जिणाणं एएसि पयाण छट्ठिबहुवयणं ।
आइम्मि 'नमो' सद्दो 'ॐ ह्रीं' सहि(हि)ओ अ पढमपए ॥ ७ ॥
गुरुउज्झाणेणेसो कम्मक्खयकारणो परममंतो ।
झायव्वो अ तिकाले निच्चं परमिट्ठिमुद्दाए ॥ ८ ॥
खीरासव-महुआसव-अमियासवलद्धिआन पत्तेयं ।
अक्खीणमहाणसलद्धियाण संभिन्नसोयाणं ॥ ९ ॥
नमो पयाणुसारिअलद्धीणं तह य बीयबुद्धीणं ।
नमो अ कुट्ठबुद्धीण सव्वपया 'ॐ नमो' आमी ॥ १० ॥
एएसि नमोक्कारं किच्चा इणाइ नाणभो स्सारा ।
मोक्खमग्गो सिद्धा नायव्वा गुरुपसाएणं ॥ ११ ॥

किसुअसुअसुहवन्नं झाणं धरिऊण जोणिमुद्दाए ।
विज्जं सो सोहग्गं पावइ जवईण जोगं च ॥ १२ ॥
उत्ततकणयवन्नं ०॥ १३ ॥ (१)
सजलजलवाहवन्नं ०॥ १४ ॥ (२)
इअ एए उवएसा सव्वे नाऊण झाइ जो सूरी ।
सो पुन्नचंदसूरीण संमयं लहइ सिवसुक्खं ॥ १५ ॥

इति विचारगर्भितं लब्धिस्तोत्रं समाप्तम् ॥

१०. परिशिष्टम् ।

सिरिमुणिसुन्दरसूरिविरइयं
संतिकरथवणं ।

संतिकरं संतिजिणं जगसरणं जयसिरीई दायारं ।
समरामि भत्त-पालग-निव्वाणी-गरुडकयसेवं ॥ १ ॥
'ॐ सनमो विप्पोसहिपत्ताणं संतिसामिपायाणं ।
झ्रौं स्वाहा'मंतेणं सव्वासिवदुरिअहरणाणं ॥ २ ॥
'ॐ संति-नमुकारो खेलोसहिमाइलद्धिपत्ताणं ।
सौं ह्रीं' नमो सव्वोसहिपत्ताणं च देइ सिरिं' ॥ ३ ॥
वाणी-तिहुअणसामिणि सिरिदेवी-जक्खराय-गणिपिडगा ।
गह-दिसिपाल-सुरिंदा सया वि रक्खंतु जिणभत्ते ॥ ४ ॥
रक्खंतु मम रोहिणी-पन्नत्ती वज्जसिंखला य सया ।
वज्जंकुसि-चक्केसरि-नरदत्ता-कालि-महकाली ॥ ५ ॥
गोरी तह गंधारी महजाला माणवी अ वइरुट्टा ।
अच्छुत्ता माणसिआ महमाणसिया उ देवीओ ॥ ६ ॥
जक्खा गोमुह-महजक्ख-तिमुह-जक्खेस-तुंबरू कुसुमो ।
मायंग-विजय-अजिआ बंभो मणुओ सुरकुमारो ॥ ७ ॥

छम्मुह पयाल किन्नर गरुडो गंधव्व तह य जक्खिंदो ।
कुबर वरुणो भिउडी गोमेहो पास-मायंगा ॥ ८ ॥
देवीओ चक्केसरि-अजिआ-दुरिआरि-कालि-महकाली ।
अच्चुय-संता-जाला सुतारया सोय-सिरिवच्छा ॥ ९ ॥
चंडा विजयंकुसि-पन्नइत्ति-निव्वाणि-अच्चुआ-धरणी ।
वइरुट्ट-छुत्त-गंधारि-अंब-पउमावई सिद्धा ॥ १० ॥
इय तित्थरक्खणरया अन्ने वि सुरा सुरीउ चउहा वि ।
वंतर-जोइणिपमुहा कुणंतु रक्खं सया अम्हं ॥ ११ ॥
एवं सुदिट्ठिसुरगणसहिओ संघस्स संतिजिणचंदो ।
मज्झ वि करेउ रक्खं मुणिसुंदरसूरि थुअ-महिमा ॥ १२ ॥
इअ संतिनाहसम्मद्दिट्ठियरक्खं सरइ तिकालं जो ।
सव्वोवद्दवरहिओ स लहइ सुहसंपयं परमं ॥ १३ ॥
[तवगच्छगयणदिणयरजुगवरसिरिसोमसुंदरगुरूणं ।
सुपसायलद्धगणहरविज्जासिद्धी भणइ सीसो ॥ १४ ॥]

११. परिशिष्टम् ।

श्रीमुनिसुन्दरसूरिरचितं

श्रीगौतमगणधरस्तोत्रम् ।

सूरिमन्त्राधिष्ठायकस्तवत्रयी ।

[१ अ]

जयसिरिविलासभवणं वीरजिणंदस्स पढमसीसवरं ।
सयलगुणलद्धिजलहिंसिरिगोयमगणहरं वंदे ॥ १ ॥
'ॐ' सह 'नमो भगवओ' जगगुरुणो 'गोयमस्स सिद्धस्स'।
बुद्धस्स पारगस्स अक्खीणमहाणसस्स' सया ॥ २ ॥
'अवतर अवतर भगवन् ! मम हृदये भास्करीश्रियम् ।
बिभ्रद्धि ह्रीँ श्रीँ ज्ञानादि वितरतु तुभ्यं नमः स्वाहा' ॥ ३ ॥

एगइ तुह नाममंतो जम्म मणे सयरोछियं दितो ।
चिंतामणि-सुरपायव-कामघडाइ किं तस्स ॥ ४ ॥

गिरिगोयमगणनायग ! तिहुयणजणसरणदुरियदुहहरण ! ।
भवतारण ! रिउवारण ! होसु अणाहस्स मह नाहो ॥ ५ ॥

मेरुसिरे सिंहासण कणयमहासहसपत्तकमलट्ठिअं ।
सुरिगणकाणं विमयगसिप्पहगोयमं वंदे(?)॥ ६ ॥

सव्वसुहम्मद्दिट्ठाया सुमरियमित्तो वि गोयमो भयवं ।
पइट्ठिभगणहरमंतो दिज्जा मम मणवंछियं सयलं ॥ ७ ॥

इय सिरीगोयमसंथुअं सुगिसुंदरपुहपयं मए पि तुमं ।
देहि महासिद्धिमिरफलयं भुवणकप्पतरुवरस्स ॥ ८ ॥

इति श्रीगौतमगणधरस्तोत्रम् ॥

श्रीसूरिमन्त्रस्तुतिः ।

[२ आ]

जयश्रियं श्रीजिनशासनस्य फलिद्विपोत्योतिकुविघ्नहर्ता ।
परे य एते ह्युत्तेऽधुनाऽपि श्रीसूरिमन्त्रं भयतः स्तवीमि ॥ १ ॥

त्वं तीर्थकृत् त्वं परमं च तीर्थं त्वं गौतमस्त्वं गणभृत् सुधर्मा ।
त्वं विश्वनेता त्वमसीहितानां निधिः सुखानामिह मन्त्रराज ! ॥ २ ॥

किं कामधेनुः सुरपादपो वा किं कामकुम्भः सुमनो मणिर्वा ।
यदि प्रसन्नः सकलेष्टदायी श्रीसूरिमन्त्रोऽसि जगत्पतिस्त्वम् ॥ ३ ॥

त्वयि स्थिते किं ननु विघ्नवर्गाः के दुर्जनाः के प्रतिपक्षभूपाः ।
के वैरिणस्ते किमुपद्रवाश्च स्वामिन् ! समग्रं हि सुसाकृदेव ॥ ४ ॥

न लब्धयः काश्चन ते प्रभावात् त्वयि प्रभो ! भक्तिभृतां दुरापाः ।
सदा सुखानन्दितचेतसो यत् खेलन्ति ते श्रीमहिमप्रभाभिः ॥ ५ ॥

प्रवर्तितं तीर्थमिदं जनस्य जयाद्यदाद्युः प्रसहेत कुधी ।
यदागमो यद्विजयी च धर्मस्त्वदत्र हेतुर्भगवाँस्त्वमेव ॥ ६ ॥

श्रीवर्धमानस्य निदेशतस्त्वं प्रतिष्ठितो गौतमगच्छनेत्रा ।
सिद्धिः समग्रा शिवसंपदश्च सर्वोग्रपुण्यानि फलानि दत्से ॥ ७ ॥

इति महामुनिसुन्दरसंस्तवतोऽकृत गणधरमन्त्रपतेर्मया ।
महिमवारिनिधेः स्तुतभक्तितो वितर मेऽर्पितसर्वसुखश्रियम् ॥ ८ ॥

इति श्रीसूरिमन्त्रस्तुतिः ॥

श्रीसूरिमन्त्रस्तोत्रम् ।

[३५]

१२. परिशिष्टम् ।

श्रीमुनिसुन्दरसूरिरचितं

श्रीगौतमस्तोत्रम् ॥

जयश्रियां सेवधिमेधमानसमग्रलब्धिहृदिनीनदीशम् ।
सुरासुरेन्द्रालिविधीयमानक्रमाम्बुजोपासनभासमानम् ॥ १ ॥
सहस्रपत्राद्भुतहेमपद्मे पद्मासनासीनमदीनमेधम् ।
जगत्त्रयैकप्रभुतामभावममाभिरामं मुनिराजिराजम् ॥ २ ॥
अनुत्तरश्राप्रमयं निरङ्कमृगाङ्कबिम्बोज्ज्वलकायकान्तिम् ।
श्रीवर्धमानादिमशिष्यनाथं श्रीगौतमस्वामिनमानुवामि ॥ ३ ॥
—विशेषकम् ।
निदेशतो वीरजिनेश्वरस्य दशममश्लोकमितं व्यधाद् यः ।
श्रीसूरिमन्त्रं त्रिजगद्धितैषी स गौतमो रातु ममेष्टसिद्धिम् ॥ ४ ॥
सरस्वती विश्वहितात्त्वधाना सुरीश्वरध्यानपदप्रभावा ।
सहस्रहस्तमथिता त्रिलोकस्वामिन्यपि प्रार्थितशस्तदात्री ॥ ५ ॥
श्रीर्देवता विश्वविमोहनी चासुरेन्द्रवर्गैस्त्वरनीयरूपा ।
यक्षाधिपो विंशतिशस्तहस्तस्फुरज्जगज्जैत्रपराक्रमश्च ॥ ६ ॥
इन्द्राश्चतुःषष्टिरभीष्टदाश्च त्रिलोकरक्षामभवत्प्रभावाः ।
यक्षाश्चतुर्विंशतिरार्हताङ्घ्रिसेवापवित्रीक्रियमाणगात्राः ॥ ७ ॥
देव्योऽपि दिव्याव्ययशक्तियुक्ता भक्ता जिनेष्वार्हतसद्रसक्ताः ।
उपासते यं गणधारिमन्त्राधिष्ठायिका नित्यमचिन्त्यभक्त्या ॥८॥
यन्नाममन्त्रोऽपि जयत्यचिन्त्यशक्तिर्मरुत्कुम्भ-मणि-द्रुमादीन् ।
तं सर्वचिन्तातिगशर्महेतुं श्रीगौतमं नौमि भवाब्धिसेतुम् ॥ ९ ॥
पदं यथाब्धिस्तटिनीतटीनां खं तारकाणां विटपील्लतानाम् ।
तथा विभो ! गौतम ! सर्वलब्धिप्रभामहिम्नां भगवँस्त्वमेव ॥ १० ॥
मुक्तिं व्रजँस्त्वं न्यदधाः स्वनाम्नि सश्रीसदीनांय ! निजानुलब्धीः ।
वसत्यदो यत्र नरे गणेन्द्र ! वसन्ति यत्ता अपि तत्र सर्वाः ॥ ११ ॥

कान्ताः शिवाप्तौ तव लब्धयस्त्वां दुःखाद् भ्रमन्त्यः किल वीक्ष्यमाणाः ।
नामापि शृण्वन्ति तवेश ! यत्र सुत्कण्ठयेवानुसरन्ति तं द्राक् ॥ १२ ॥

तवाऽऽतपस्यासमयात् कराब्जे जज्ञे निलीना खलु केवलश्रीः ।
दीक्षामिषाद् यन्न्यदधा यदीयशिरस्सु तं ते द्रुतमापुरेताम् ॥ १३ ॥

त्वयाऽऽत्मनो वीरजिनाधिपेनाऽभेदस्तथाऽध्यायि वशेन भक्तेः ।
अनन्तचिद्-दर्शन-वीर्य-सौख्यलाभात् तदात्मैव विभो ! यथाऽभूः ॥ १४ ॥

शिवश्रियः कोऽपि दृढोऽनुरागस्त्वयीश ! सौभाग्यरमात्मकेऽहो ! ।
नामाऽपि यत् ते जपतः प्रबुद्धानेषाऽखिलान् प्रापयतेश ! शर्म ॥ १५ ॥

त्वदीयभक्तेः शिवशर्मलक्ष्म्या मैत्री प्रभो ! काऽपि परा नवीना ।
स्वाधारकान् भव्यजनान् गुणाढ्यांस्तस्यै पतीन् सा हि ददात्यशेषान् ॥१६॥

न के पदार्था बहवो महान्तस्तव प्रभावे तु विचिन्त्यमाने ।
पृथ्वी न पृथ्वी न गिरिर्गरीयान् नाब्धिर्महीयांश्च नभोऽप्यदभ्रम् ॥ १७ ॥

विदन्ति मानं जलधेर्भुवो वा केचित् कथञ्चिन्नभसोऽपि विज्ञाः ।
न ते प्रभावे पुनरस्ति मानं अनन्त्यमाना अपि किं तदार्थाः ! ॥ १८ ॥

ब्रह्मास्पदं वा कमलापदं वा वदन्तु पद्मं तव पादयोऽस्तु ।
अनाप्य माहात्म्यरमा तु तस्यै निषेवतेऽम्बूनि सदा तपस्वी ॥ १९ ॥

भोः ! भोः ! श्रिये किं व्यवहारखेदैराराधितैः किं बहुमन्त्र-तन्त्रैः ।
किं दैवतोपासनकर्मभिश्च श्रीगौतमं ध्यायत नाथमेकम् ॥ २० ॥

पुरा यथा गौतम ! तापसादिकान् मिथ्यामतादुद्धरसि स्फुरत्कृपः ।
तपस्क्रिया-संयम-योगदुर्बलं भवावटान्मामपि तद्वदुद्धर ॥ २१ ॥

भवाद् बिभेम्युत्कटदुःखराशेर्धर्तुं द्विधेशो न च योगशुद्धिम् ।
गतिर्न मेऽन्याऽस्ति ततः शिवेच्छोस्त्वमेव तद्देहि कृपा मयीश ! ॥ २२ ॥

भावद्विषो ये निहतास्त्वयेश ! ते व्यन्तरीभूय भवद्रुषेव ।
निरौजसं त्वत्कुलजं समीक्ष्य मां पीडयन्तीति मुनीन्द्र ! रक्ष ॥ २३ ॥

गणिवर ! तव सद्गुणैकलीनं भवतु मनो मम गौतमाविरामम् ।
विजहतु तदिमे कषायमुख्या रिपुनिकराश्च मयीति सुप्रसीद ॥ २४ ॥

एवं श्रीगणनाथ ! गौतमगुरो ! स्तुत्वा मयाऽभ्यर्थ्यसे
नाम्नाऽहं मुनिसुन्दरोऽभवमयो कुर्याः प्रसादं तथा ।
स्यां सर्वज्ञ ! यथार्थतोऽपि विशदज्ञानादिरत्नत्रया-
छुब्ध्वा कर्मजयश्रियं शिवपुरे राज्यं लभे चाचिरात् ॥ २५ ॥

इति श्रीयुगप्रधानावतारबृहत्तपागच्छाधिराजश्रीदेवसुन्दरसूरि-श्रीज्ञानसागरसूरि-श्रीसोमसुन्दरसूरिशिष्यैः श्रीमुनिसुन्दरसूरिभिर्विरचिते जयश्रीके श्रीजिनरत्नकोशे प्रथमप्रस्तावे श्रीगौतमस्तोत्रमेकविंशम् ॥

---

१३. परिशिष्टम् ।

श्रीसूरिमन्त्रस्तोत्रम् ।

लक्षैर्यो जपेदेनमेक-त्रि-पञ्च-सप्तभिः ।
सकलं गौतमं मन्त्रं महासिद्धिकरं भवेत् ॥ ९ ॥

षट्कर्मकृज्जयश्रीद आकृष्टि-सुखकृत् सदा ।
ऐहिकार्थप्रदः स्वर्ग-मोक्षसौख्यकरस्त्वयम् ॥ १० ॥

आदेशं सूरये दत्ते शुभो वाऽप्यशुभः पुनः ।
चिन्तारत्नप्रभः सप्तमेरुमन्त्रो जिनैः स्मृतः ॥ ११ ॥

प्रणवं मायाबीजं [च] श्रीपदं मेरुसंज्ञकम् ।
इरि किरि गिरि पिरि सिरि हिरि आयरियं ॥ १२ ॥

वर्णत्रयादत उर्ध्वं गिरिमेरु नमस्ततः ।
'स्वाहा'शब्दं प्रयुञ्जीत सप्तमेरुप्रभावजुट्(जुक्) ॥ १३ ॥

अष्टम्यां च चतुर्दश्यां कृतोपवासः स्मरेद् यतिः ।
आदेशाय महाविद्या महिम्ने वाञ्छिताय च ॥ १४ ॥

ॐ इरिइरिकालीति सचक्रमुद्रया तथा ।
क्षयाय कृष्णध्यानेन मासं यावत् प्रयुज्यते ॥ १५ ॥

ॐ इरि किरि गिरि पिरि सिरि हिरि आचार्यपदमन्त्रराजस्य ।
कुर्याज्जापं त्रिलक्षं च गौतमः स भवेद् गुरुः ॥ १६ ॥

अष्टोत्तरसहस्रं तु दीपोत्सवे जपः कृतः ।
तैः पुष्पैरक्षतैस्तैश्च चूर्णं वश्याय जायते ॥ १७ ॥

अष्टम्यां चतुर्दश्यां मेरुमन्त्रं जपेद् गुरुः ।
अष्टोत्तरसहस्रं यो लभते स समीहितम् ॥ १८ ॥

अलोभो जितपञ्चाक्षः सच्छीलो नय-सत्यगाक् ।
शुचिश्च विहितस्नानो मन्त्रराजं स्मरेत् कृती ॥ १९ ॥

मौनेन सततं भुङ्क्ते कायोत्सर्गेण यः स्मरेत् ।
तं स्तुवन्ति सुराः सर्वे वक्तुमेतस्य कः क्षमः ॥ २० ॥

इति श्रीसूरिमन्त्रस्तोत्रं समाप्तम् ॥

१४. परिशिष्टम् ।

श्रीमन्त्राधिराजगर्भितश्रीगौतमस्वामिस्तवनम् ।

नमोऽस्तु श्री-ह्री-धृति-कीर्ति-बुद्धि-लक्ष्मीविलासैकनिकेतनाय ।
श्रीवीरपट्टाम्बरभास्कराय लोकोत्तमाय प्रभुगौतमाय ॥ १ ॥

ॐकारमक्षीणमहानसानां श्रीमन्त्रमग्रुज्जृम्भतपःप्रभावैः ।
ह्रीमन्त्रमात्मानुगवन्दनेनार्हन्तं नमस्यामि तमिन्द्रभूतिम् ॥ २ ॥

उभिन्नसौवर्णसहस्रपत्रगर्भस्थसिंहासनसंनिषण्णम् ।
दिव्यातपत्रं परिवीज्यमानं सचामरैश्चामरराजसेव्यम् ॥ ३ ॥

कल्पद्रु-चिन्तामणि-कामधेनुसमाननामानममानशक्तिम् ।
अनेकलोकोत्तरलब्धिसिद्धं श्रीगौतमं धन्यतमाः स्मरन्ति ॥ ४ ॥

एकैव षड्दर्शनदक्षजीविका पुराण-वेदागमजन्मभूमिका ।
आनन्दचिद्ब्रह्ममयी सरस्वती सदेन्द्रभूतेश्चरणोपसेविनी ॥ ५ ॥

सदा चतुष्पष्टिसुरेन्द्रमानसव्यामोहिनी पद्महृदाधिवासिनी ।
सर्वाङ्गिशृङ्गारतरङ्गितद्युतिः श्रीगौतमं श्रीरपि वन्दते त्रिधा ॥ ६ ॥

जया-जयन्ती-विजया-ऽपराजिता-नन्दा-सुभद्राप्रमुखः सुरीजनः ।
प्रतिक्षणोज्जागरभूरिविभ्रमः श्रीगौतमं गायति गाढगौरवः ॥ ७ ॥

मानुषोत्तरगिरेः शिरःस्थिता दोःसहस्रसुभगा महाप्रभा ।
गीतगौतमगुणा त्रिविष्टपस्वामिनी शिवशतं ददातु मे ॥ ८ ॥

यक्षषोडशसहस्रनायको दिव्यविंशतिभुजो महाबलः ।
द्वादशाङ्गसमयाधिदेवता गौतमस्तुतिजुषां शिवङ्करः ॥ ९ ॥

ईशाननायेन समं शतक्रतुः सनत्कुमाराधिपतिः सुरान्वितः ।
श्रीब्रह्मलोकाधिपतिश्च सेवते सगौतमं मन्त्रवरं पदे पदे ॥ १० ॥

अष्टनागकुलनायको मणिप्रोल्लसत्फणसहस्रभासुरः ।
गौतमाय धरणः कृताञ्जलिर्मन्त्रराजसहिताय वन्दते ॥ ११ ॥

रोहिणीप्रभृतयः सुराङ्गना वासवा अपि परे सदाश्रवाः ।
गौतमं मनसि यक्ष-यक्षिणीश्रेणयोऽपि दधती मुनीश्वरम् ॥ १२ ॥

सज्जलाभधनभोगधृतीनां लब्धिरद्भुततमेह भवे स्यात् ।
गौतमस्मरणतः परलोके भूर्भुवःस्वरपवर्गसुखानि ॥ १३ ॥

'ॐ क्रौं श्रीँ ह्रीँ' मन्त्रतो ध्यानकाले पार्श्वे कृत्वा प्राञ्जलिः सर्वदेवान् ।
कायोत्सर्गैर्धूप-कर्पूरवासैः पूजां कुर्यात् सर्वदा ब्रह्मचारी ॥ १४ ॥

जितेन्द्रियः स्वल्पजलाभिषेकवान् शुद्धाम्बरो गुप्ति-समित्यलङ्कृतः ।
श्रीइन्द्रभूतेरुपवैणवं गुणान् स्मरन् नरः स्याच्छ्रुतसिन्धुपारगः ॥ १५ ॥

तं श्रयन्ति पुरुषार्थसिद्धयो भूष्यते विशदसाहसेन सः ।
गौतमः प्रणयिभुक्तिमुक्तिदो यस्य भाविविभवस्य नाथते ॥ १६ ॥

इति श्रीमन्त्राधिराजगर्भितश्रीगौतमस्वामिस्तवनं समाप्तम् ॥

१५. परिशिष्टम् ।

श्रीसिद्धतिलकसूरिविरचितं

परमेष्ठिविद्यायन्त्रम् ।

श्रीवीरजिनं नत्वा वक्ष्ये श्रीविबुधचन्द्रपूज्यपदम् ।
गणिविद्यायुगपदतो यन्त्रं परमेष्ठिविद्यायाः ॥ १ ॥

त्रिभाकारं क्रमशश्चतुरष्ट-द्व्यष्टपत्रपद्मान्तः ।
किञ्जल्कपूज्यबीजं यन्त्रं लेख्यं सुरभिदलैः ॥ २ ॥

मध्ये 'ऽर्हं' ऊर्ध्वादिषु 'सि आ उ सा' रेखिकादलचतुष्के ।
ऋषभोऽथ वर्धमानश्चन्द्रानन-वारिषेणको दिक्षु ॥ ३ ॥

अष्टदलेषु क्रमशो 'युगादिनाथाय' तद् 'नमो'ऽत्रैव ।
गोमुख-चक्रेश्वर्यौ शस्यं कान्तं जिनः सुरश्च सुरी ॥ ४ ॥

द्व्यष्टदलेषु क्रमशः 'सुविधिजिनाय नमः' इत्यथ त्रिदशः ।
देवी श्रीवीरान्तं एवं तद् वच्मि नामानि ॥ ५ ॥

युगादीशोऽजितः स्वामी शम्भवोऽप्यभिनन्दनः ।
सुमतिः पद्मलक्ष्मा श्रीसुपार्श्वश्चन्द्रलाञ्छनम् ॥ ६ ॥

सुविधिः शीतलः श्रेयान् वासुपूज्यप्रभस्ततः ।
विमलानन्त-धर्मः श्रीशान्ति-कुन्थुररो जिनः ॥ ७ ॥

मल्लिः [च] सुव्रत-नमी नेमी श्रीपार्श्वतीर्थकृत् ।
'वीर'श्च जिननामान्ते 'नाथाय नमः' इत्यदः ॥ ८ ॥

श्रीगोमुखो महायक्षस्त्रिमुखो यक्षनायकः ।
तुम्बरुः कुसुमस्तस्मान्मातङ्गो विजयोऽजितः ॥ ९ ॥

ब्रह्मा यक्षेट् कुमारः षण्मुखः पाताल-किन्नराः ।
गरुडो गन्धर्वो यक्षेन्द्रः कुबेरो वरुणस्तथा ॥ १० ॥

भृकुटिर्गोमेधः पार्श्वो मातङ्गोऽमी जिनाश्रिताः ।
चक्रेश्वरी अजितबला दुरितारिश्च कालिका ॥ ११ ॥

महाकाल्यच्युता श्यामा भृकुटिश्च सुतारिका ।
अशोका मानवी चण्डा विदिताऽथ प्रियाङ्कुशा ॥ १२ ॥
कन्दर्पा निर्वाणी बला धारिणी धरणप्रिया ।
नरदत्ताऽथ गान्धारी अम्बिका पद्मावती तथा ॥ १३ ॥
सिद्धायिका इमा जैन्यः क्रमात् शासनदेवताः ।
जिन-देव-सुरीनामत्रयं प्रति दलं दलम् ॥ १४ ॥
एकोऽर्हन् सिद्धाद्याः पट् तीर्थेश्वराः क्रमादथ ।
चन्द्राभ-सुविध्याद्या अर्हत्-सिद्धादयः मान्वत् ॥ १५ ॥

" ॐ नमो अरिहो भगवओ अरिहंत-सिद्ध-आयरिय-उवज्झाय-सव्वसंघ-धम्म-तित्थपवयणस्स ।

ॐ नमो भगवईए सुयदेवयाए संतिदेवयाए सव्वदेव-पवयणदेवयाणं दसण्हं दिसापालाणं पंचण्हं लोगपालाणं ठः ठः स्वाहा ॥ "

विधेयं वलयाकृत्या लेख्या नवं-गज(८९)प्रमा ।
अस्यां वर्णाः श्लोकयुग्मं पञ्चविंशतिरक्षराः ॥ १६ ॥
मघवाऽग्निर्यमो रक्षो वरुणो वायुदिक्पतिः ।
पूर्वादौ धनदेशानौ नागो विधिरुर्ध्वगः ॥ १७ ॥
अट्ठमहारिद्धीओ हिरि-सिरि-लच्छि-बुद्धि-कंतीओ ।
विजया जया जयन्ती वियरइ अपराजिया वि तहिं ॥ १८ ॥
पूर्वादिक्रमतो दिक्षु एतद्गाथांघ्रिरेकतः ।
एकतः श्रुतदेवी तु पुस्तकाम्भोजशालिनी ॥ १९ ॥
एकतः शान्तिदेवी च करे स्वर्णकमण्डलुः ।
सुधारसभृतं पद्माऽक्षसूत्रमपि बिभ्रती ॥ २० ॥
राजत-स्वर्ण-रत्न[नां]प्राकारत्रितयं दिनेन् ।
चतुर्द्वारं स्फुरद्रत्न-ध्वज-तोरणराजितम् ॥ २१ ॥
भूमण्डलं ततो दिक्षु 'क्षि' विदिक्षु 'ल'कारवान् ।
यद्वाऽप्मण्डलं सार्धं 'व'कारैः कल्प्यमाहति ॥ २२ ॥

इति मन्त्रन्यसनम् ॥

प्रागस्याश्वतस्रोऽस्ति निरञ्जनं चैत्रम्(?)।
आदावन्त्ये मध्ये एकादश जन्मयुतान्तानि ॥ २३ ॥

दुःशील-निह्नव-गुरुद्रोहक-विध्वस्तचैत्य-यतनीकान्।
पातरपञ्चकृतमपि यो दूरात् त्यजति योग्य इह ॥ २४ ॥

जिनभक्तिर्गुरुसेवी अव्यसन-विवाद-राजभक्तकथः।
प्रियवाग् जितेन्द्रियमना योग्यः परमेष्ठिविद्यायाः ॥ २५ ॥

पूर्वोत्तरेशदिग्वक्त्रः पद्मासन-सुखासनः।
सौभाग्य-योगमुद्राभृत् कृताह्वानादिकक्रियः ॥ २६ ॥

'ॐ भूरिसि भूतधात्री भूमिशुद्धिं कुरु कुरु।
स्वाहा' इति कौङ्कुमाम्भोभिश्चिन्त्यं तद्भूमिसेचनम् ॥ २७ ॥

'ॐ ह्रीं' विमले तीर्थजलान्तरशुचिः शुचिः।
भवामि स्वाहा' इति शान्तिदेवी मधुरितेक्षणा ॥ २८ ॥

कमण्डलुसुधाम्भोभिर्मां स्नापयतेऽथवा।
षोडश विद्यादेव्यस्तीर्थाम्भोभिर्विचिन्त्यताम् ॥ २९ ॥

यद्वा चन्द्रसुधास्नातः क्षाराब्धौ योजनप्रमम्।
पुण्डरीकं समारूढो द्रष्टुं तानर्हदादिमान् ॥ ३० ॥

पोएहि रॅवलपालो कणयमयंको हुयासणो जाणुं।
डैर-नाहि-हियिय-पंढी दों हत्था पाय-मुंह-सीसं ॥ ३१ ॥

धॅणपालो जॅयपालो अॅच्छुत्ता भॅयवई य वयरुट्टा।
देवो हॅरिणगवेसी वॅजधरो रक्खए सव्वं ॥ ३२ ॥

"ॐ श्रीं द्रां णां आं ह्रीं ॐ अ सि आ उ सा क्षिप ॐ स्वाहा ॥"

विदिताष्टाङ्गदिग्रक्षश्चन्द्रादिवर्णमानिमान्।
विद्याक्षरान् स्मरन् शान्तिमसुखं तनुतेऽचिरात् ॥ ३३ ॥

सम्यग्दृशां महाब्रह्मचारिणां गुरुरत्नतः।
गृहीता पठिता सिद्धा विद्या सर्वकरी मता ॥ ३४ ॥

व्याख्यानादौ विवादे वा विहारे जनरञ्जने।
सप्तकृत्वः स्मृता विद्या तत्तत्कार्यप्रसाधिका ॥ ३५ ।

जातीपुष्पयुतैः शालितन्दुलैः सत्फलैरपि ।
जप्ता दशांशहोमेन प्रीणिता कुरुते न किम् ? ॥ ३६ ॥

एतद्विद्यान्तरोद्भूतखण्डविद्याफलान्यथ ।
वक्ष्यामि जैनसिद्धान्तरहांसि स्मरणाकृते ॥ ३७ ॥

'सत्त्व'शब्दं विना विद्या गुरुपञ्चकनामभूः ।
द्व्यष्टाक्षरात्महृत्पद्मे गर्भे देवो निरञ्जनः ॥ ३८ ॥

यद्वा–"अर्हत्-सिद्धाचार्योपाध्याय-सर्वसाधुभ्यो नमः ॥"

हृदम्बुजे इमां विद्यां संस्कृतैः षोडशाक्षरैः ।
लभते द्विशतीं ध्यायन् चतुर्थतपसः फलम् ॥ ३९ ॥

'अरिहंत-सिद्ध'शब्दाज्जपन् विद्यां षडक्षरीम् ।
शतत्रयेण लभते चतुर्थतपसः फलम् ॥ ४० ॥

'अरिहंत'चतुर्वर्णं जपन् ध्यानी चतुःशतीम् ।
लभते दृष्टजैनात्मा चतुर्थतपसः फलम् ॥ ४१ ॥

'अ'वर्णं तु सहस्रार्धं(५००) नाभ्यब्जे कुण्डलीतनुम् ।
ध्यायन्नात्मानमाप्नोति चतुर्थतपसः फलम् ॥ ४२ ॥

गुरुपञ्चकनामाद्यमेकैकमक्षरं तथा ।
नाभौ मूर्ध्नि मुखे कण्ठे हृदि स्मर क्रमान्मुने! ॥ ४३ ॥

'अ'वर्णं नाभिपद्मान्ते 'सि'वर्णं तु शिरोऽम्बुजे ।
'सा' मुखाम्बुजे 'आ' कण्ठे 'उ'कारं हृदये स्मर ॥ ४४ ॥

मन्त्राधीशः पूज्यैरुक्तोऽसौ किन्तु देहरक्षायै ।
शीर्ष-मुख-कण्ठ-हृत्त-पदक्रमेण 'असिआउसा' स्थाप्याः ॥ ४५ ॥

प्रणवः पञ्चशून्यान्यग्रे 'असिआउसा नमः' ।
अस्याभ्यासादसौ सिद्धिं प्रयाति गतबन्धनः ॥ ४६ ॥

शाम्यन्ति जन्तवः क्षुद्रा व्यन्तरा ध्यानघातिनः ।
तद् वक्ष्येऽष्टदिक्पत्रे गर्भे सूर्यमहः स्वकम् ॥ ४७ ॥

'ॐ नमो अरिहंताणं' क्रमात् पूर्वादिपत्रगम् ।
मत्वाशामेकमेकाहः एकादशशतीं जपेत् ॥ ४८ ॥

ध्यानान्तरायाः शाम्यन्ति मन्त्रस्यास्य प्रभावतः ।
कार्ये सप्रणवो ध्येयः सिद्धये प्रणवं विना ॥ ४९ ॥

यद्वाऽष्टदले पद्मे गर्भे स्यात् प्रथमं पदम् ।
दिक्षु(४) सिद्धादिचतुष्कं विदिक्ष्वन्यचतुष्ककम् ॥ ५० ॥

एतां नवपदीं विद्यां प्रणवादिं विना स्मरेत् ।
'नमो अरिहंताणं' यद्वाऽन्तश्चतुर्दले ॥ ५१ ॥

सिद्धादिकचतुष्कं च दिग्दलेषु मुनीन्दुभिः ।
अपराजितमन्त्रोऽयं मुक्तपापक्षयङ्करः ॥ ५२ ॥

हृदि वा 'नमो सिद्धाणं' अन्तर्दलचतुःक्रमात् ।
पञ्चवर्णमयो मन्त्रो ध्यातः कर्मक्षयङ्करः ॥ ५३ ॥

'श्रीमदृषभादि-वर्धमानान्तेभ्यो नमः'मयः ।
मन्त्रः स्मृतः सर्वसिद्धिकराऽत्र तीर्थशब्दतः ॥ ५४ ॥

'श्रुतदेवता'शब्देन सरस्वती वाच्या ।

"ॐ अर्हन्मुखकमलवासिनि ! पापात्मक्षयङ्करि ! श्रुतज्ञानज्वालासहस्रप्रज्वलिते ! मत्पापं हन हन दह दह क्षां क्षीं क्षूं क्षौं क्षः क्षीरधवले ! अमृतसंभवे ! वं वं हुं हुं स्वाहा ॥"

गणभृद्भिर्जिनैरुक्तां तां विद्यां पापभक्षिणीम् ।
स्मरन्नष्टशतं नित्यं सर्वशास्त्राब्धिपारगः ॥ ५५ ॥

*वाग् माया कमलाबीजे क्ष्वाँ क्ष्वीं श्रीं ततः स्फुर स्फुर ।
ॐ क्रों ह्रीं ऐं वागीश्वरी भगवती मरुत्प्रमः ॥ ५६ ॥

एतं सारस्वतं मन्त्रं विबुधचन्द्रपूजितम् ।
स्मरेत् सरस्वती देवी साक्षाद् ध्यातुर्वरप्रदा ॥ ५७ ॥

अत्र विशेषः [कुण्डलिनीवर्णनम्]—

गुदमध्य-लिङ्गमूले नाभौ हृदि कण्ठ-घण्टिका-भाले ।
मूर्धन्यूर्ध्वे नव षट् कण्ठान्ता पञ्च भालयुताः ॥ ५८ ॥

आधाराख्यं स्वाधिष्ठानं मणिपूर्णमनाहतम् ।
विशुद्धि(द्ध)-लम्बना-ऽऽज्ञा-ब्रह्म-सुषुम्णाख्यया नव ॥ ५९ ॥

*मन्त्रोद्धारः—"ऐं ह्रीं श्रीं क्ष्वाँ क्ष्वाँ श्रीं स्फुर स्फुर, ॐ क्रों ह्रीं ऐं वागीश्वरी भगवती स्वाहा ।"

अम्बुधि रस-दश-सूर्याः षोडश विंशतिः गुणास्तु षोडशकम् ।
दशशतदलमथवाऽन्त्यं षट्कोणं मनसाक्षपदम् ॥ ६० ॥

दलसंख्या इह साद्या ह-क्षान्ता मातृकाक्षराः ।
षट्सु चक्रेषु व्यस्तमिता देहमिदं भारतीयन्त्रम् ॥ ६१ ॥

आधाराद्या विशुद्ध्यन्ता पञ्चान्तस्तालुशक्तिभृत् ।
आज्ञा भ्रूमध्यतो भाले मनो ब्रह्मणि चन्द्रमाः ॥ ६२ ॥

रक्तारुणं सितं पीतं सितं रक्तत्रयं सितम् ।
चक्रं वर्णा इतः भाग्वदादौ पत्राणि पञ्चसु ॥ ६३ ॥

चतुष्टये क्रमात् सूर्याः त्रि-षट्-द्व्यष्टदलावली ।
तदन्तर्नवबीजानि त्रिष्वादौ त्रिपुराऽथवा ॥ ६४ ॥

नवचक्रान्तः क्रमशो वाग्भवमुख्यानि मन्त्रबीजानि ।
तत्राद्ये रविरोचिषि त्रिकोणमर्केन्दुनाडिभ्याम् ॥ ६५ ॥

भगबीजमेतदूर्ध्वे कुण्डलिनीतन्तुमात्रमभ्रकल्पम् ।
वाग्भवबीजं श्वेतं ध्यातं सरस्वतीसिद्धिः ॥ ६६ ॥

अरुणमिदं वह्निपुरं ध्यातं मात्रां विनाऽपि वश्यकृते ।
किन्तु समात्रं यद्वा मायान्तःकामबीजमध्ये वा ॥ ६७ ॥

ध्यातं स्वाधिष्ठाने षट्कोणे ह्रीँ स्मरस्य बीजमुत ।
ईकाराङ्कुशताणितशरो वर-स्त्रीकमिह वश्यम् ॥ ६८ ॥

मणिपूर्णे श्रीबीजं जपारुणं वर्णदक्षकदशदिग्भ्यः ।
ईश्वरताणितवस्तूच्छ्रयमिह वश्यं च लाभकरम् ॥ ६९ ॥

मालान्तर्भ्रूमध्ये त्रिकोण-कोदण्डखेचरीत्याख्यम् ।
अस्योर्ध्वे मध्ये वा माया-स्मरबीजयोरेकम् ॥ ७० ॥

आधारान्तर्वाग्भवकुण्डलिनीतन्तुबद्धवश्यशिरः ।
कृत्वाऽधः स्थितमरुणं ध्यातं बीजान्तरुत वश्यम् ॥ ७१ ॥

यद्वा—

भ्रूमध्यान्तः 'स्त्रीँ स्त्रीँ' बीजं निर्यदमृतवर्षभरम् ।
ध्यातं विषरोगहरं त्रिकोणके मूर्ध्नि पूर्ववत् स्वरम् ॥ ७२ ॥

यदिवा—

कुण्डलिनीतन्तुद्युतिसंभृतमूर्तीनि सर्वबीजानि ।
शान्त्यादिसंपदे स्युरित्येष गुरुक्रमोऽस्माकम् ॥ ७३ ॥

किं बीजैरिह शक्तिः कुण्डलिनी सर्वदेववर्णजनुः ।
रवि-चन्द्रान्तर्ध्याना मुक्त्यै भुक्त्यै च गुरुसारम् ॥ ७४ ॥

भ्रूमध्य-कण्ठ-हृदये नाभौ कोणे त्रयान्तराध्यातम् ।
परमेष्ठिपञ्चकमयं मायाबीजं महासिद्ध्यै ॥ ७५ ॥

विबुधचन्द्रगणभृच्छिष्यः श्रीसिंहतिलकसूरिरिमम् ।
परमेष्ठिमन्त्रकल्पं लिलेख सद्वाग्देवताभक्त्या ॥ ७६ ॥

इति परमेष्ठिमन्त्रकल्प ॥

---

१६. परिशिष्टम् ।

श्रीसिंहतिलकसूरिरचित

लघुनमस्कारचक्रम् ॥

—*—

नत्वा विबुधचन्द्रार्च्यं यशोदेवमुनिं गुरुम् ।
वक्ष्ये लघुनमस्कारचक्रं साहाय्यदेवता ॥ १ ॥

द्व्यष्टरेखाभिरष्टारं सप्तभिर्व्यष्टभिः परम् ।
रेखाभिरष्टवलयं चक्रं कुर्वे जिनाक्षरः(रम्) ॥ २ ॥

"ॐ नमो अरिहंताणं" आद्यं पदचतुष्टयम् ।
अरमध्ये द्विरावर्त्य लेख्यं प्रणवपूर्वकम् ॥ ३ ॥

पाशाङ्कुशाभयैः सार्द्धं वरदोऽरान्तरे क्रमात् ।
लिख्यतेऽमु[ष्यो]रान्तेऽय "आँ क्रौं ह्रीँ श्रीँ" चतुष्टयम् ॥ ४ ॥

प्राक् "प्रणवो नमो लोए सव्वसाहूणं" इत्यपि ।
प्रथमे वलये लेख्यं प्राग्वत् पञ्चपदीफलम् ॥ ५ ॥

"ॐ नमो चत्तारि मंगलं अरिहंता मंगलं सिद्धा ।"
जाव "धम्मं सरणं पवज्जामि" एवं द्वादशपदी ॥ ६ ॥

अर्हत्-सिद्धाः साधुर्धर्मो मङ्गलचतुष्टयं तद्वत् ।
लोकत्तरशरणावपि लेख्यं वलये द्वितीये तु ॥ ७ ॥

द्वादशान्तमनाः साधुः पञ्चदशपदीमिमाम् ।
विद्यां समणवां ध्यायन् शिवं यात्यपफलमपः ॥ ८ ॥

उक्तं च —

"मङ्गल-लोकोत्तम-शरण्यपदसमूहं सुसंयमी स्मरति ।
अविकलमेकाग्रतया लभते स स्वर्गमपवर्गम्" ॥ ९ ॥

तृतीये वलये "ॐ-माया"युता वर्णसप्ततिः(७०) ।
बीजाक्षरचतुष्कं च जिनबीजपदाश्रयम् ॥ १० ॥

"ॐ ह्रीं श्रीं ऽर्हं"

"ॐ नमो भगवओ तिहुयणपुज्जस्स वद्धमाणस्स ।
जस्सेयं खलु चक्कं जलंतमागच्छए पयडं ॥ ११ ॥

"आयासं पायालं लोयाणं तह य चेव भूयाणं ।
जूए वा रयणे वा विवं रायंगणे वावि ॥ १२ ॥

एवं च "थंभणे मोहणे तह य सव्वजीवसत्ताणं ।
अपराजिओ भवामि स्वाहा" इय मंतविन्नासो ॥ १३ ॥

चैत्रेऽष्टाहिकायां तु त्रयोदश्यां विशेषतः ।
सहस्रैः जातिकुसुमैः सप्तभिर्वीरमर्चयेत् ॥ १४ ॥

जापैः सहस्रैरेतैः स्यादखण्डैः शालितन्दुलैः ।
दृढब्रह्मव्रतस्यैवं सिद्धाऽसौ पठतोऽथवा ॥ १५ ॥

सन्ध्याद्वयं स्मरन्नेवं व्यसनैर्ग्रह-मुद्गलैः ।
द्विपादैः श्वापदैर्दुष्टैर्न पराजीयते क्वचित् ॥ १६ ॥

वन्ध्यायां काकवन्ध्याया निन्दू-दुर्भगयोषितोः ।
वरं न लभते कन्या या तस्या विधिरेषकः ॥ १७ ॥

चैत्ये सातिशये वेश्मैकदेशे शुचिभूतले ।
कृत्वा त्रिवर्णचूर्णेन त्रिरेखा-पट्-चतुरस्रवान् ॥ १८ ॥

चतुर्द्वारं चतुर्दिक्षु पूर्वादौ वज्र-मुद्गरौ ।
परशु-शक्तिमालिख्य मध्येऽष्टपत्रमम्बुजम् ॥ १९ ॥

प्रतिपत्रं सुरत्रयीमिश्रा अष्टौ च पुत्रकाः ।
तदूर्ध्वं कलशानष्टौ वक्त्रकुसुमसत्फलान् ॥ २० ॥
तीर्थाम्भोभिर्जिनस्नात्रसुगन्धिजलमिश्रितैः ।
पूरयित्वा सुवस्त्रेणाच्छादितानञ्जगर्भकैः ॥ २१ ॥
नव घटद्वयं रक्तं पूर्ववज्जलसंभृतम् ।
पुष्पमालाश्रसत्पत्र-फल-पुष्पं विधाय च ॥ २२ ॥
अपराह्णे तथा सायं मन्त्रेणानेन कुम्भगम् ।
अभिमन्त्र्य जलं सर्वमष्टाधिकशतं मुनिः ॥ २३ ॥
गन्ध-धूप-सुमैर्दीपैरक्षतैर्बलिभिर्नवैः ।
सम्यगभ्यर्च्य तत् सर्वं विदधीत सुवाससा ॥ २४ ॥
निशायाः पश्चिमे यामे शयितेषु द्विकेष्विमाम् ।
एकदेशेन नग्नां स्त्रीं दुर्भगाद्येकदूषणाम् ॥ २५ ॥
सप्तदी-क्षितटी-कुम्भकृद्-गजराजवेश्मनः ।
सप्तवाल्मीकफलितक्षेत्रमृत्स्नाविलेपनम् ॥ २६ ॥
कृत्वैकत्र च कुम्भाम्भोऽभिमन्त्र्य स्नपितामथ ।
तद्वासस्त्याजिता साऽन्यवस्त्रेणापिहिताङ्गिका ॥ २७ ॥
निषिद्धपृष्ठतो दृष्टिर्नेतव्याऽऽत्मगृहं ततः ।
प्रातः सूर्योदये सूरिर्मण्डलमष्टपूजया ॥ २८ ॥
अभ्यर्च्यानेन मन्त्रेण मध्ये संस्थाप्य तां स्त्रियम् ।
सप्तगृहनीत्तृणैः सप्तभिः काकपक्षकैः ॥ २९ ॥
निर्मर्त्स्यानेन मन्त्रेण त्रिधा प्रागुक्तमुद्रया ।
पुत्तलिकयाऽपि निर्मर्त्स्य समुद्धृत्य चतुष्पथे ॥ ३० ॥
सर्वमेतत् परिक्षिप्य स्त्रियं प्रागुक्तमृत्स्नया ।
विलिप्य मन्त्रपुञ्जैस्तु शेषकुम्भाम्भसां भरैः ॥ ३१ ॥
संस्नप्य स्वगृहं प्राग्वद् नयेद् वस्त्रयादिकं तदा ।
शेषे च देयमेतस्यै सप्तरात्रमयं क्रमः ॥ ३२ ॥
सप्तमेऽह्नि जिनं सद्यं संपूज्य लब्धशेषिका ।
सौभाग्यादि सा स्यादेवं ग्रहग्रहे शिशोः ॥ ३३ ॥

अत्र कूटाक्षराः सर्वे सस्वरा अष्टवर्गतः ।
ते स्युर्व्यद्धनमस्कारचक्रे अ(तद)ष्टारक्रमात् ॥ ३४ ॥
"ॐ नमः" पूर्वं 'थंभेइ०' इति गाथाचतुर्थके ।
वलये योजनशतं यावत् स्तम्भक्रिया भवेत् ॥ ३५ ॥
"ॐ नमो थंभेइ जलं जलणं चिंतियमित्तोवि पंचनवकारो ।
अरि-मारि-चोर-राउलघोरुवसग्गं पणासेइ" ॥ ३६ ॥

अत्र विधिः—

शिलापट्टेऽथ भूर्जे वा फलके क्षीरवृक्षजे ।
कुं-गो-गोमय-गोक्षीरैर्जात्यादिलेखनीकरः ॥ ३७ ॥

पद्ममष्टदलमध्ये 'ह'पिण्डं तस्य चान्तरा ।
गर्भवत्याः स्त्रियो नाम प्रतिपत्रं 'ह'पिण्डकम् ॥ ३८ ॥
पद्मस्य बहिर्वलये गाथा 'थंभेइ०' अग्रतः ।
अमुकस्याः स्त्रियो गर्भं स्तम्भामीति लिखेदथ ॥ ॥ ३९ ॥
बहिर्भूमण्डलं दिक्षु 'ह'पिण्डाष्टकमालिखेत् ।
शिलापट्टादि संपुटय घनं बद्ध्वा शुचि क्षितौ ॥ ४० ॥
त्रिसन्ध्यमष्टधाऽभ्यर्च्य जपेत् साष्टसहस्रकम् ।
यावद् वर्षार्धवर्षं वा गर्भस्तम्भोऽथवा विधिः ॥ ४१ ॥

एतद् भूर्यादिकं सिक्त्थकेनावेष्ट्य धृताम्बरा ।
अर्च्यते पूर्ववत् स्तम्भस्तत्र कार्ये समर्थ्यते ॥ ४२ ॥
तत् समुद्धृत्य दुग्धेनाथवा गन्धाम्बुना स्मरन् ।
मन्त्रं प्रक्षालयेदेवं प्रसूते सा सुतं सुखम् ॥ ४३ ॥

अग्निस्तम्भे अष्टपत्रपद्ममध्ये दलान्तरा ।
'ग'पिण्डं बहिर्वलये गाथा स्पष्टा विलिख्यते ॥ ४४ ॥
भूमण्डलाष्टदिग्भागे 'ग'पिण्डं पूर्ववद् विधिः ।
जापः शतं सहस्रं वाऽग्निस्तम्भो धर्मदर्शिनाम् ॥ ४५ ॥
अष्टदलेऽम्बुजान्तश्च 'ध'पिण्डं वलये बहिः ।
गाथा भूमण्डले दिक्षु 'ध'पिण्डं पूर्ववद् विधिः ॥ ४६ ॥

पद्ममष्टदलं फों 'फ'पिण्डान्तः साधकाभिधा ।
प्रतिपत्रं 'फ'पिण्डं च गाथा स्याद् वलये बहिः ॥ ४७ ॥

भूमण्डलाष्टदिग्भागे 'फ'पिण्डं पूर्ववत् क्रिया ।
जापः शतं सहस्रं वा तुल्या(ला)-दिव्यनिषेधनम् ॥ ४८ ॥

पद्ममष्टदलं मध्ये ह्रौं स्याद् 'ह'पिण्डमध्यगम् ।
साध्यनाम दलेष्वन्तः 'ह'पिण्डं वलये बहिः ॥ ४९ ॥

गाथा भूमण्डलं दिक्षु 'ह'पिण्डं पूर्ववद् विधिः ।
जापः शतं सहस्रं वा घटसर्पनिषेधनम् ॥ ५० ॥

पद्ममष्टदलं मध्ये क्ष्रौं 'क्ष'पिण्डमध्यगम् ।
साध्यनाम प्रतिपत्रं 'क्ष'पिण्डं पूर्ववद् विधिः ॥ ५१ ॥

गाथा भूमण्डलं दिक्षु 'क्ष'पिण्डं पूर्ववद् विधिः ।
जापः शतं सहस्रं वा जयेत् पक्षादिजं विषम् ॥ ५२ ॥

पद्ममष्टदलं गर्भे 'क्ष'पिण्डं साध्यनामयुक् ।
'क्ष'पिण्डं प्रतिपत्रान्तः सगाथं वल्यं बहिः ॥ ५३ ॥

भूमण्डलाष्टदिग्भागे 'क्ष'पिण्डं पूर्ववत् क्रिया ।
जिह्वा-रण-गति-क्रोधव्यवहारनिषेधनम् ॥ ५४ ॥

देश-ग्राम-पुरं यद्वा गृहस्यैकस्य वा गवाम् ।
शाकिन्यादिकृतां मारिं निषेद्धुमिह सुव्रती ॥ ५५ ॥

भूर्यादौ चक्रमालिख्य तद्देशाद्यभिधायुतम् ।
कृत्वा रक्षां सिक्थकेनावेष्ट्य मन्त्राभिमन्त्रितम् ॥ ५६ ॥

कांस्यपात्रे नवे शान्तिप्रतिमाचरणाग्रतः ।
रक्षां वां त्रिमधुरेणाकण्ठं शान्तिं तु पूरयेत् ॥ ५७ ॥

शान्तिपाठः—

भुक्त्वा स्त्री-गज-रत्न-चक्रमहतीं राज्यश्रियं श्रेयसे
प्रव्रज्यां दुरिताश्रयप्रमथनी येन श्रिताऽभूत् पुरा ।
मृत्यु-व्याधि-जरा-वियोगमगमत् स्थानं च योऽत्यद्भुतं
तं वन्दे मुनिमप्रमेयमृषभं सेन्द्रामराभ्यर्चितम् ॥ ५८ ॥

एवं 'बृहन्नमस्कार'प्रोक्तं श्रीशान्तिमन्त्रकम् ।

यद्वा—

'थंभेइ जलं०' इत्यादिगाथां जपन् शताधिकाम् ॥ ५९ ॥

शुक्लवस्त्रेण संछाद्यं त्रिसन्ध्यमष्टपूजया ।
त्रिदिनं त्रिदिनस्यान्ते महापूजापुरस्सरम् ॥ ६० ॥

अभिषेकजलं तत् तु क्षेप्यं श्रीकलशान्तरे ।
श्रीशान्तिप्रतिमां हस्ति-शिबिका-रथमूर्धनि ॥ ६१ ॥

शुक्लवस्त्रवृताङ्गस्य नरस्य ब्रह्मचारिणः ।
कुलशुद्धस्य मान्यस्य मूर्ध्नि कृत्वा सचामराम् ॥ ६२ ॥

छत्रेण सहितां चन्द्रोदये ध्वजस्रजाञ्चिताम् ।
तूर्यत्रिकोल्लसद्वातां प्रदीपद्युतिभासुराम् ॥ ६३ ॥

चतुर्विधेन सङ्घेन संयुतः सूरिरुद्यमी ।
मारिगृहीतग्रामाद्यष्टदिक्षु प्रददेद् बलिम् ॥ ६४ ॥

दिने तस्मिन्नमारिः स्यात् पटहोद्घोषपूर्वकम् ।
चतुर्विधाय सङ्घाय भक्त्या दानं दिशेन्मुनिः ॥ ६५ ॥

दानं दीनादिषु प्राज्यं देयमेवंकृते सति ।
मारिर्निवर्तते किन्तु तत्कुम्भजलसेचनात् ॥ ६६ ॥

गोमार्यादिषु गोवाटप्रवेशे श्रावकैः शुभैः ।
तत्कुम्भजलसिक्ता गौर्मूर्ध्नि गोमारिवारणम् ॥ ६७ ॥

पञ्चमे वलये लेख्या 'ॐ नमः' पूर्वमेषिका ।
'स्वाहा'न्ता गाथिका क्षेत्र-स्वसैन्यत्राणकारिणी ॥ ६८ ॥

"अट्ठेव य अट्ठसयं अट्ठसहस्सा य अट्ठकोडीओ ।
रक्खंतु मे सरीरं देवासुरपणमिया सिद्धा" ॥ ६९ ॥

भूर्यादावेषिका गाथा लिखिता चन्दनादिभिः ।
रक्ष्या जिनान्तिके पूज्या बद्धा दोषज्वरापहा ॥ ७० ॥

'ॐ नमो अरिहंताणं' पूर्वं 'अट्ठविहा'दिकाम् ।
गाथां वलये षष्ठे 'स्वाहा'न्तां विलिखेन्मुनिः ॥ ७१ ॥'

"अट्ठविहकम्ममुक्को तिलोयपुज्जो य संथुओ भयवं ।
अमर-नर-रायमहिओ अणाइनिहणो सिवं दिसउ" ॥ ७२ ॥

सप्तमे वलये 'ॐ' प्राक् 'नमो सिद्धाणं' इत्यतः ।
'तव०' इत्याद्यां लिखेद् गाथां 'स्वाहा'न्तां शिवगामिनीम् ॥ ७३॥

"तवनियमसंयमरहो पंचनमोकारसारहिनिउत्तो ।
नाणतुरंगमजुत्तो नेइ पुरं परमनिव्वाणं स्वाहा" ॥ ७४ ॥

'ॐ'प्राग् 'धणु'द्वयं तस्मा'न्महाधणु महाधणु ।
स्वाहा' इतीमां धनुर्विद्यामष्टमे वलये लिखेत् ॥ ७५ ॥

कायोत्सर्गे उपोष्यैनां श्रीवीरप्रतिमाग्रतः ।
अष्टोत्तरं सहस्रं प्राग् जपेत् सिद्धा मुनेरसौ ॥ ७६ ॥

स्मृत्वैतां पथि धूल्यन्तरालिख्य सशरं धनुः ।
आक्रम्य वामपादेन मौनी गच्छेन्न दस्युतः ॥ ७७ ॥

युद्धकाले जिनं वीरं संपूज्याष्टशतः स्मृतेः ।
प्राग्वद् धनुःक्रियां कृत्वा युद्धे गच्छेन्न शस्त्रभीः ॥ ७८ ॥

परेषां सम्मुखीभूतां धनुर्विद्यां महोमयीम् ।
इन्द्रचापसदृक्कान्तिं ध्यायेन्मन्त्रं पठेदमुम् ॥ ७९ ॥

तद्ध्यानावेशतो वैरिसेना पराङ्मुखी तथा ।
सैन्यद्वयं प्रतीपं चेद् ध्यायते सैन्यसंधिदा ॥ ८० ॥

वलयाष्टबहिर्दिक्षु पद्मं षोडशपत्रकम् ।
प्रतिपत्रं विलिख्यन्ते 'अं'आद्याः षोडशस्वराः ॥ ८१ ॥

आदिद्वयष्टस्वराग्रे तत् प्रत्येकं 'ह्रूँ' इहाक्षरम् ।
षोडशास्वरसंबद्धं 'ह्रूँ ह्राँ ह्रिँ ह्रीँ'मुखं लिखेत् ॥ ८२ ॥

एतदूर्ध्वं द्व्यष्टधदलं पद्मं तु प्रतिपत्त्रम् ।
षोडश विद्या लेख्या या मन्त्रबीजयुता तथा ॥ ८३ ॥

१ 'ॐ यॉं रोहिण्यै अँ नमः ।'
२. 'ॐ राँ प्रज्ञप्त्यै आँ नमः ।'
३. 'ॐ लाँ वज्रशृङ्खलायै इँ नमः ।'
४. 'ॐ वाँ वज्राङ्कुश्यै ईँ नमः ।'

५. 'ॐ शाँ अप्रतिचक्रायै उँ नमः ।'
६. 'ॐ पाँ पुरुषदत्तायै ऊँ नमः ।'
७. 'ॐ साँ काल्यै ऋँ नमः ।'
८. 'ॐ हाँ महाकाल्यै ॠँ नमः ।'
९. 'ॐ यूँ गौर्यै लृँ नमः ।'
१०. ॐ रूँ गान्धार्यै लॄँ नमः ।'
११. 'ॐ लूँ सर्वास्त्रमहाज्वालायै एँ नमः ।'
१२. 'ॐ वूँ मानव्यै ऐँ नमः ।'
१३. 'ॐ शूँ वैरोट्यायै ओँ नमः ।'
१४. 'ॐ षूँ अच्छुप्तायै औँ नमः ।'
१५. 'ॐ सूँ मानस्यै अँ नमः ।'
१६. 'ॐ हूँ महामानस्यै अँः नमः ।'

इति मन्त्रबीजपूर्वा विद्यादेव्यो दलेषु स्युः ॥

देवीषोडशपत्राग्रे परमेष्ठिपदाक्षराः ।
षोडशोर्ध्वे स्फुरच्चन्द्रबिन्दवो ज्योतिरञ्चिताः ॥ ८४ ॥

'अरिहंत-सिद्ध-आयरिय-उवज्झाय-साहुवक्खियं विंदुं ।
जोयणसयप्पमाणं जालासयसहस्सदिप्पंतं ॥ ८५ ॥

'सोलससु अक्खरेहिं इक्किकं अक्खरं जगुज्जोयं ।
भवसयसहस्समहणं जम्मि ठिओ पंचनवकारो' ॥ ८६ ॥

उक्तं च– बिन्दुं विनाऽपीत्यादिचतुःश्लोकी ॥

चतुर्षु पट्कोणेषु चँतुरँष्ट-दँशँ-द्विकँम् ।
अष्टापदजिना ज्ञेयाः 'चत्तारि०' इत्यादिगाथया ॥ ८७ ॥

यद्वाऽष्टचत्वारिंशत्सहस्रा द्व्यधिकं शतम् ।
जातीसुमनसां जापो होमो दशांशभागय ॥ ८८ ॥

'श्रीइन्द्रभूतये स्वाहा' 'ॐ प्रभासाय' पूर्ववत् ।
पटस्यैशानकोणे द्वौ गाथैका पूर्वदिग्गता ॥ ८९ ॥

'सोमे अ वग्गु वग्गु सुमणे सोमणसे तह य महुमहुरे ।
किलि किलि अप्पडिचक्का हिलि हिलि देवीओ सव्वाओ ॥ ९० ॥

'ॐ अग्निभूतये स्वाहा' 'स्वाहा'न्ते 'वायुभूतये'।
पटस्याग्नेयकोणे द्वौ मन्त्रावेकस्तयोरधः ॥ ९१ ॥

'ॐ असिआउसा हुलुहुलु चुलुद्वयं' ततः।
'इच्छियं मे कुरुद्वन्द्वं स्वाहा' सर्वार्थसिद्धिदा ॥ ९२ ॥

दक्षिणस्यां दिशि 'ॐ'प्राग् 'व्यक्तायाथ मरुप्रभः'।
'ॐ' प्राक् 'सुधर्मस्वामिने स्वाहा' इति च पदद्वयम् ॥ ९३ ॥

नैर्ऋते 'मणवः' पूर्वे 'मण्डिताय मरुप्रभः'।
'मणवो मौर्यपुत्राय स्वाहा' इति गणभृद्द्वयम् ॥ ९४ ॥

पश्चिमायां 'वाय्वग्निभ्यां स्वाहा'न्ते 'मणवः' पुरः।
'अकम्पिताचलभ्राता मेतार्यः' इति मध्यतः ॥ ९५ ॥

प्राच्यां गायेश[:] काष्ठादौ चतुर्विदिक् त्रिदिक् क्रमात्।
द्वौ द्वावेकैकश्च सूरिराजान इति मे मतिः॥ ९६ ॥

यद्वा—

प्राच्यां गुरुस्ततः प्राग्वद् गौतमासनमम्बुजम्।
गाथाबीजयुतं ध्यानं वाच्यं प्राक् सूरियन्त्रतः ॥ ९७ ॥

बहिश्चतुर्दलं पत्रं चतुर्दिक्षु लिखेदिदम्।
'ॐ नमो सन्त्रसिद्धाणं' पदं सर्वार्थसाधकम् ॥ ९८ ॥

अष्टारमौलिकुम्भेषु 'जम्भे' 'मोहे' चतुष्टयम्।
द्विरावर्त्य क्रमाल्लेख्यमयं मन्त्रश्च पश्चिमे ॥ ९९ ॥

'ॐ नमो अरिहंताणं एहि एहि नंदे महानंदे पंथे बंधे दुप्पयं बंधे चउप्पयं बंधे घोरं आसीविसं बंधे जाव गंठिं न मुञ्चामि' ॥

इमामष्टशतं स्मृत्वा कृत्वा ग्रन्थिं स्ववाससि।
पथि गम्यं न चौराद्युपद्रवः छोटयते स्थितौ ॥ १०० ॥

'मायाबीजं' त्रिरेखाभिरुपर्यावेष्टयमन्ततः।
'क्रौं' भूमण्डलं यद्वा वारुणं स्वस्ववर्णकम् ॥ १०१ ॥

मध्ये 'ऽर्हं'बीजमावेष्टयं केचिद् रत्नत्रयाक्षरैः।
केचिच्च बीजचक्रेण गुरुरेव ममा मतः ॥ १०२ ॥

ध्यानम्—

अथ ध्यानविधिं वक्ष्ये जितेन्द्रियः दृढव्रतः ।
सम्यग्दृग् गुरुभक्तश्च सत्यवाग् मन्त्रसाधकः ॥ १०३ ॥

एकान्ते शुचिभूमौ स पूर्वोत्तराशादिङ्मुखः ।
तीर्थाम्भो-गोमयरसैः सिक्तां भूमिं विचिन्तयेत् ॥ १०४ ॥

सहस्रदलपद्मान्तःपर्यङ्कासनसंश्रितम् ।
प्रसन्नाभिर्जयाद्यष्टसुरीभिस्तीर्थवारिभिः ॥ १०५ ॥

भृतैः सुवर्णभृङ्गारैर्वक्त्रदत्ताम्बुजैः स्वकम् ।
स्नप्यमानं विचिन्त्यामुं मन्त्रं हृदि विचिन्तयेत् ॥ १०६ ॥

'ॐ नमो अरिहंताणं अशुचिः शुचिरित्यतः ।
भवामि स्वाहा' इति स्नातः कुर्याद् देहस्य रक्षणम् ॥ १०७ ॥

१. 'ॐ नमो अरिहंताणं ह्रीँ हृदयं रक्ष रक्ष हुं फट् स्वाहा ।'
२. 'ॐ नमो सिद्धाणं हर हर शिरो रक्ष रक्ष हुं फट् स्वाहा ।'
३. 'ॐ नमो आयरियाणं ह्रीँ शिखां रक्ष रक्ष हुं फट् स्वाहा ।'
४. 'ॐ नमो उवज्झायाणं एहि भगवति ! चक्रे ! कवचवज्रिणि ! हुं फट् स्वाहा ।'
५. 'ॐ नमो लोए सव्वसाहूणं क्षिप्रं साधय साधय दुष्टं वज्रहस्ते ! शूलिनि ! रक्ष रक्ष आत्मरक्षा सर्वरक्षा हुं फट् स्वाहा ॥'

कृत्वाऽमीभिः स्वाङ्गरक्षां दिग्बन्धं च 'इन्द्रभूतये ।
स्वाहा'थैः सर्वगणभृदाह्वानं क्रियते ततः ॥ १०८ ॥

त्रिभाकारस्फुरज्ज्योतिः समवसृतिमध्यगम् ।
चतुःषष्टिसुराधीशैः पूज्यमानक्रमाम्बुजम् ॥ १०९ ॥

छत्रत्रयं पुष्पवृष्टि-मृगेन्द्रासन-चामराः ।
अशोक-दुन्दुभि-दिव्यध्वनिभांमण्डलान्यपि ॥ ११० ॥

इत्यष्टभिः प्रातिहार्यैर्भूषितं सिंहलाञ्छनम् ।
संसदन्तः सुवर्णाभं वर्धमानं जिनं हृदि ॥ १११ ॥

साक्षाद् विलोकयन् ध्याता तल्लीनाक्षिमना अमुम् ।
अष्टोत्तरं शतं मन्त्रं सूरिमन्त्रसमं जपेत् ॥ ११२ ॥

एतद् यन्त्रं जैनधर्मचक्रमष्टारभासुरम् ।
अष्टदिक्षु स्फुरद्भाभिः शतयोजनदीपकम् ॥ ११३ ॥
तच्छायाक्रान्तवित्रस्तदुरितं सर्वपूजितम् ।
आत्मानं च स्मरेन्नित्यं तस्य स्युरष्टसिद्धयः ॥ ११४ ॥
मोक्षाभिचार-मारेषु शान्त्याकृष्ट्यादिषु क्रमात् ।
अङ्गुष्ठादि-कनिष्ठान्तमक्षसूत्रं करे धरेत् ॥ ११५ ॥
इति लघुनमस्कारचक्रम् ॥

—*—

१७. परिशिष्टम् ।

श्रीसिंहतिलकसूरिरचितं
ऋषिमण्डलस्तवयन्त्रालेखनम् ॥

*

श्रीवर्द्धमानमीशं ध्यात्वा विबुधचन्द्रसूरिनतम् ।
ऋषिमण्डलस्तवादिह यन्त्रस्यालेखनं वक्ष्ये ॥ १ ॥
सौवर्ण-रूप्य-कांस्ये पटात्मदेहेऽर्चनाकृते स्थाप्यम् ।
रक्षायै भूर्जदले कर्पूराद्यैः सुवर्णलेखिन्या ॥ २ ॥
बहिः क्षाराब्धिवलयं श्यामलं लग्नतोऽक्षरैः ।
सपट्पञ्चाशता(५६) व्याप्तमन्तरद्वीपभूमिभिः ॥ ३ ॥
मध्ये जम्बूद्वीपस्तदष्टकाष्ठाक्रमेण संस्थाप्यम् ।
अर्हत्-सिद्धाद्यभिधापञ्चयुग् ज्ञान-दर्शन-चारित्रम् ॥ ४ ॥
आदावंशो फणी शम्भुर्वर्णश्चन्द्रकलाश्रयुक् ।
द्वि-चतुः-पञ्च-षट्-सप्ताष्ट-दशार्कस्वरश्च क्रमात् ॥ ५ ॥
'परमेष्ठ्यक्षराद्याः पञ्चातो ज्ञान-दर्शन- ।
चारित्रेभ्यो नमः' मन्त्रः पदबीजाष्टकोज्ज्वलः ॥ ६ ॥

[मन्त्रोद्धारः—जाप्यमन्त्रः—]

"ॐ ह्राँ ह्रीँ हुँ हूँ ह्रेँ ह्रैँ ह्रौँ ह्रः अ सि आ उ सा ज्ञान-दर्शन-चारित्रेभ्यो नमः ॥"

आदौ 'ॐ ह्राँ' प्रभृत्येकं बीजयुगं ततो नमः ।
मध्येऽर्हद्भ्यः सिद्धेभ्य इति दिक्षु पदाष्टकम् ॥ ७ ॥
एषामधः क्रमादिन्द्राग्नि-यमा नैर्ऋतिस्तथा ।
वरुणो वायु-कुबेरावीशानश्च यथाक्रमम् ॥ ८ ॥

एषामथो रविश्चन्द्र-मङ्गलौ बुध-वाक्पती ।
भार्गवः शनि-राहू च लिखेद् दिक्षु ग्रहाष्टकम् ॥ ९ ॥
अष्टमन्त्रपदैं रक्षा स्वशिखा-मस्तकाक्षिषु ।
नासिका-मुख-घण्टीषु नाभि-पादान्तयोः क्रमात् ॥ १० ॥
तन्मध्ये पीतवलयं सुमेरुस्ताभिरक्षरम् ।
तदन्तः द्विर्त्रिशैः कूटैः काद्यैः क्षान्तैः सुधाशुभम् ॥ ११ ॥
तदूर्ध्वं ह्रीँ स्वरान्तस्थ-सान्तसिंहासनो जिनः ।
ह्रीँ त्रिरेखयाऽऽवेष्ट्य बहिर्वारुणमण्डलम् ॥ १२ ॥
पार्थिवीधारणायुक्त्या पिण्डस्थं मन्त्रयुक्तितः ।
पदस्थमर्हतो रूपवद् यन्त्रं रूपयुक् क्रमात् ॥ १३ ॥
तिर्यग्लोकसमः क्षीराम्बुधिस्तस्यान्तरम्बुजम् ।
जम्बूद्वीपः सदिक्पत्रं स्वर्णाद्रिस्तत्र कर्णिका ॥ १४ ॥
सिंहासनेऽत्र चन्द्राभे आत्मानन्दं परं श्रितः ।
अर्हन्मयो हृदि ध्येयः पार्थिवीधारणेत्यसौ ॥ १५ ॥
रेफः सान्तः शिरश्चन्द्रकलाग्रं नाद ईश(स्व)रः ।
सशिरो-रेफ-हः पीतः कला रक्ताऽसितं वियत् ॥ १६ ॥
नादः श्वेतः स्वरः तुर्यो नीलो वर्णानुगा जिनाः ।
चन्द्राभ-सुविधी नादः शून्यं श्रीनेमि-सुव्रतौ ॥ १७ ॥
कला षडर्कसंख्यौ स्यात् पार्श्व[श्र] मल्लिरीश्व(स्व)रः ।
सशिरो-रेफ-हो द्व्यष्टौ जिना इति चतुर्युगम् ॥ १८ ॥
नादोऽर्हन्तः कला सिद्धाः सान्तः सूरिः स्वरोऽपरे ।
बिन्दुः साधुरितः पञ्चपरमेष्ठिमयस्त्वसौ ॥ १९ ॥

अन्यत्र विशेष –

अर्हन्तो वृत्तकला त्रिकोण-सिद्धास्तु शीर्षकं सूरिः ।
चन्द्रस्त्वोपाध्यायो दीर्घकला साधुरिह पञ्च ॥ २० ॥
अर्हन्तः शशि-सुविधी सिद्धा पद्माभ-वासुपूज्यजिनौ ।
धर्माचार्याः षोडश मल्लिः पार्श्वोऽप्युपाध्यायः ॥ २१ ॥
सुव्रत-नेमी साधुर्जिनरूपः शक्ति-शिवमयस्त्वेषः ।
त्रिपुरूपमूर्तिर्ध्येयाऽम्भस्परपुः सर्वधर्मबीजमिदम् ॥ २२ ॥
जैनमिह धर्मचक्रं तच्छायागर्भगं न पश्यन्ति ।
ड र ल क स (ष) ह सा (या)ऽरि-गजाः रक्षोऽपि सिंह-दुष्ट-नृपाः॥२३

श्रीगौतमस्य मुद्राभिर्लब्धिभिर्मौ निधीश्वरम् ।
त्रैलोक्यवासिनो देवा देव्यो रक्षन्तु सर्वतः ॥ २४ ॥
ॐ ह्रीँ श्रीश्च धृतिर्लक्ष्मीर्गौरी चण्डी सरस्वती ।
जयाऽम्बा विजयेत्याद्या विद्या यच्छन्तु मे धृतिम् ॥ २५ ॥
भ्रष्टराज्यादयो यं यमर्थमिच्छन्ति तं नराः ।
लभन्तेऽस्य स्मृतेर्युद्धाद्यापदश्च तरन्त्यमी ॥ २६ ॥
भूर्जपत्रान्तरालिख्य रक्षा कण्ठ-शिरः-करे ।
मुद्गल-ग्रह-भूतार्तिहृद् वश्यादिप्रसाधनी ॥ २७ ॥
त्रैलोक्यवर्तिजैनानां बिम्बैर्दृष्टैः स्तुतैर्नतैः ।
यत् फलं तत् फलं बीजस्मृतावेतन्महद् रहः ॥ २८ ॥
अष्टाचाम्लतपःपूर्वं जिनानभ्यर्च्य सिद्धये ।
अष्टनातीसहस्रैस्तु जापो होमो दशांशतः ॥ २९ ॥
अष्टमासान् स्मरेत् प्रातर्बीजमेतच्छताधिकम् (१०८) ।
स पश्येदार्हतं बिम्बं सप्तान्तर्भवसिद्धये ॥ ३० ॥
सम्यग्दृशे विनीताय ब्रह्मव्रतभृते इदम् ।
देयं मिथ्यादृशे नैव जै(जि)नाज्ञाभङ्गदूषणः(णम्) ॥ ३१ ॥
परमेष्ठिपदानां तु विशेषः पूर्वयन्त्रतः ।
ज्ञेयो रत्नत्रयस्याथ विशेषः कश्चिदुच्यते ॥ ३२ ॥
ज्ञान-दर्शन-चारित्र-तपांसीति स्मरन् मुनिः ।
शतमष्टोत्तरं लब्ध्वा(ब्धा) चतुर्थतपसः फलम् ॥ ३३ ॥
कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च ।
अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ३४ ॥
पतद् व्यसनपाताले भ्रमत् संसारसागरे ।
अनेनैव जगत् सर्वमुद्धृत्य विधृतं शिवे ॥ ३५ ॥
मूर्ध्नि रत्नत्रयं बिभ्रज्जिनबीजं नमोऽक्षरम् ।
इति रत्नत्रयं ध्येयं जिनबीजस्य बीजकम् ॥ ३६ ॥

इति श्रीसिंहतिलकसूरिकृतं
ऋषिमण्डलस्तवयन्त्रलेखनमिदम् ॥